**अनास्** त्रि॰ आस्यते निरास्यते ष्ठीवनमनेन आ+अस–क्षेपे करणे क्विप् आः सुखं नास्ति तत् साधनत्वेनास्य । आस्य-व्यापारशब्दरहिते । "अनासोदस्यूरम्हण" इति ऋ॰५,२९, १०, "अनासः आस्यरहितानि तद्व्यापारशून्यानीति" भा॰।

**अनासिक** त्रि॰ नास्ति नासिकाऽस्य । भग्ननासिके विकृत नासिके च ।

**अनास्था** स्त्री आ+स्था–अङ् आस्था आदरः अभावार्थे न॰त॰ । अनादरे । "स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सतामिति" कुमा॰ "अनास्थया सूनकरप्रसारिणीमिति" नैष॰ । न॰ब॰ । आदररहिते त्रि॰ ।

**अनास्थान** त्रि॰ आस्थीयतेऽस्मिन् आ+स्था–आधारे ल्युट् आस्थानोभूप्रदेशः न॰त॰ । आस्थानायोग्ये जलादौ । "अनारम्भणे तदवीरयेथामनास्थाने" इति ऋ॰१,११६,५ । आस्थानं सभा । तच्छून्ये च ।

**अनास्राव** आ+स्रु–वेदे घञ् न॰ब॰ । क्लेशरहिते । लोके तु अप् अनास्रव इति । "तेषामसि त्वमुत्तममनास्रावमरोगणमिति अथ॰ २,३,२ ।

**अनाह** पु॰ नह–घञ् न॰त॰ । मलादिबन्धाभावोपलक्षितेग्रहणीरोगे ।

**अनाहत** न॰ आ–हन–भावे क्त आहतं छेदो भोगो वा न॰ ब॰ । छेदभोगादिरहिते नवीने वस्त्रे । तन्त्रशास्त्रे प्रसिद्धे हृदयस्थिते सुषुम्णामध्यस्थे द्वादशदलपद्मे "शब्दो ब्रह्ममयः, शब्दोऽनाहतो यत्र दृश्यते अनाहताख्यं तत् पद्मं मुनिभिः परिकीर्त्तितमित्युक्तलक्षणे । नाभिस्थं मणिपूरं चक्रं वर्णयित्वा "तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् । कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् । तन्मध्ये बाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् । आनन्दसदनं तत्तु पुरुषाधिष्ठितं परमिति" तन्त्रसारे उक्तम् । अस्मिन् पक्षे च आहतमाघातः कण्ठताल्वाद्यभिघातः तन्नास्ति साधनत्वेनास्य तादृशः शब्दः अस्यास्ति अर्श आदित्वात् अच् । अनाहतशब्देन च परा, पश्यन्ती, मध्यमा, वैखरीतिप्रसिद्धानां वाग्वृत्तीनां मध्ये मध्यमा वाक् कथ्यते तस्यास्त्र हृदयपद्मे कण्ठादिस्थानमनाहत्यैवोत्पन्नत्वादनाहतत्वम् अधिकं मध्यमाशब्दे वक्ष्यते । ब॰ । आघातरहिते वस्तुमात्रे त्रि॰ ।

**अनाहार** पु॰ न आहारः अभावार्थे न॰त॰ । भोजनाभावे "अनाहारेणात्मानं तव द्वारि व्यापादयिष्यामीति" हितो॰ । "अनाहारेण देहिन" इति पुरा॰ ।

**अनाहार्य्य** त्रि॰ आहार्य्यः कृत्रिमः आहरणीयश्च न॰त॰। अकृत्रिमे स्वाभाविके, आहरणीयभिन्ने च ।

**अनाहिताग्नि** पु॰ न आहितः अग्निर्येन । विधिना अकृताग्न्याधाने निरग्नौ द्विजभेदे । "योऽनाहिताग्निः शतगुरयज्वा तु सहस्रगु"रिति मनुः। 'अनाहिताग्निश्रुतेश्चेति' कात्या॰ ४,१,२९, "अनाहिताग्नेरपि पिण्डपितृयज्ञः श्रूयते" इति तद्व्याख्या सा च श्रुतिस्तत्रैव दर्शिता "अप्यनाहिताग्निना कार्य्य इति" "यदि स दर्शाङ्गं स्यात् अनाहिताग्ने र्दर्शपौर्णमासाभावान्न श्रूयेतेति" तद्व्याख्या ।

**अनिकेत** पु॰ नास्ति निकेतः नियमेन निवासो यस्य ब॰ । नियतनिवासशून्ये परिव्राजके । "अनग्निरनिकेतः स्याग्मुनि र्मूलफलाशन" इति "अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेदिति" च मनुः "अनिकेतः स्थिरमतिरितिः" गीता अनिकेतनोऽप्युक्तार्थे ।

**अनिक्षु** न॰ न इक्षुः सादृश्ये, अप्राशस्त्ये वा न॰त॰ । इक्षुसदृशे गुडहेतौ (नटा) इति ख्याते काशभेदे ।

**अनिगीर्ण** त्रि॰ न निगीर्णः । अनपह्नुतभेदे, "विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत् सारोपा स्यादिति" सा॰द॰। (अनिगीर्णस्य) अनपह्नुतभेदस्य (विषयस्य) आरोपविषयस्य आरोप्यमाणस्य, (अन्यस्य) आरोपाश्रयस्य तादात्म्यमभेदस्तत्प्रतीतिकृत् तद्बोधसाधनं वृत्तिः सारोपा लक्षणेति तदर्थः यथा अश्वः श्वेतो धावतीत्यादौ श्वेतगुणवानश्वोऽनपह्नुतभेदः सन् स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते इत्यतस्तत्र सारोपा लक्षणा ।

**अनिच्छा** स्त्री न इच्छा अभावार्थे न॰त॰ । इच्छाभावे "स्फुटामनिच्छां विवरीतुमुत्सुकामिति नैष॰ । "चरेत् सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छयेति" मनुः ।

**अनित्य** त्रि॰ न नित्यः । नश्वरे, जन्ये च। "नित्याऽनित्या च च सा द्वेधा नित्या स्यादणुलक्षणा । अनित्या तु तदन्या स्यादिति" भाषा॰ । "यदि नित्यमनित्येन निर्मलं मलवाहिना । यशः कायेन लभ्येतेति" हितो॰ "रजस्वलमनित्यञ्च भूतावासमिमं त्यजेदिति" मनुः । अस्थिरे "अनित्योविजयो यस्मात् दृश्यते युध्यमानयोः। पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेदिति" मनुः । कृताकृतप्रसङ्गि नित्यं विरोधे न॰त॰। कृताकृतप्रसङ्गशून्ये वैकल्पिके, "समासान्तविधेरनित्यत्वमिति" पा॰भा॰। यावदाश्रयमवस्थानायोग्ये, "वर्णे चानित्ये" इति पा॰। अव्यवस्थिते, (यावदाश्रयसदनवस्थिते) "इह खलु द्रव्यं व्यवस्थितं न रसादयः, यथा आमे फले, ये रसादयस्ते